## जन्मभूमिं प्रति ।

स्वर्गादपि प्रेयसि जन्मभूमे
भो वङ्गभूमे प्रणमामि मातः ।
मातेति शब्दद्वदतस्तवाग्रे
मूढात्मनो मे प्रणतिं गृहाण ॥ १

मातः प्रसन्नस्त्वमिति स्मरन्तो
मन्यामहेऽस्मान् सुभगान्नराणाम् ।
रम्यामरामर्त्त्यपुरे यथा हि
त्वन्नस्तथास्मिन्नवनीतलेऽपि ॥ २

देवालयाद्रम्यतराऽथवा त्वं
देवानवेह स्वपुरीं विहाय ।
धृत्वा मनुष्यावयवानभीष्टां
गृह्णन्ति जन्म त्वयि सादरं किम् ॥ ३

पुण्यो भवाराध्यभवाश्रितः स
गोत्राधिराजः परिष्टुते त्वाम्
त्वय्येव गङ्गा वहतीशवाञ्छा
को वा कुतो देवि शुचिर्यथा त्वम् ॥ ४

सद्धातुमुक्तादिमहार्घरत्न
रत्नाकरा भान्ति धराधरास्ते ।
कस्यापि नेदृग् विभवस्तवेव
कोः सार्थकाख्या वसुधा त्वया हि ॥ ५

कालि सुतैस्ते निजविक्रमेण
जिग्येऽप्यनन्ता च ससागरेयम्।
त्रस्ताः सुरास्तेऽपि कृपामयाचन्
शौर्य्येण कस्त्वातिरिणक्ति मातः। ६

वीरा महत्यो ललनास्त्वदीया
ऐकान्तिकासक्तिवशात् प्रियेषु।
देहुः सुकान्तान्दहनेन देहान्
धन्या त्वमेका धरणीतलेऽत्र ॥ ७

विद्यामनीषादिभिरत्र लोके
सर्व्वाग्रगण्या खलु केवला त्वम्।
यावज्जगत्तिष्ठति तावदेव
तिष्ठत्यतुल्यं सुयशस्तवापि ॥ ८

सर्व्वाग्रगण्येऽखिललोकधन्ये
हे वीरमातः प्रियवङ्गभूमे।
जन्मान्तरेष्वप्यं तवैव मातु
र्लभाम जन्मानि यथा सुपुत्राः ॥ ९

TARA PADA DATTA.
2nd YEAR CLASS.